# Shrutadhamakritam Vishnu Stotram

# શ્રુતધામાકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Shrutadhamakritam Vishnu Stotram

File name : shrutadhAmAkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, tAmraparNImAhAtmya, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 61/70-80||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# શ્રુતધામાકૃતં વિષ્ણુસ્તોત્રમ્

ૐ નમસ્સત્યસઙ્કલ્પવિકલ્પોલ્લાસિતાત્મને ।
નિર્ગુણાય ગુણાવિષ્ટકર્મણે બ્રહ્મણે નમઃ ॥ ૭૦॥

સત્યં જ્ઞાનમનન્તં યદ્ધામ નામાદિવર્જિતમ્ ।
ઓમિત્યુપહિતાકારમહઙ્કારમુપાસ્મહે ॥ ૭૧॥

યતો વાચો નિવર્તન્તે મનસાપ્રાપ્ય માધવમ્ ।
હૃદ્યન્તં પરં પશ્યે ભદ્રસ્યાવાપ્તયે હરિમ્ ॥ ૭૨॥

હૃષીકં જગતાં સાક્ષાત્ શ્રુતયો યત્ પ્રશંસિરે ।
તમાદિપૌરુષં તેજઃ પ્રપદ્યે વ્યોમલક્ષણમ્ ॥ ૭૩॥

અલક્ષ્યમક્ષણાં ગુણિનાં બ્રહ્માદીનાં યદૈશ્વરમ્ ।
મહઃ પ્રપદ્યે નિર્માયં યત્પરં પરમં હરિઃ ॥ ૭૪॥

યમન્વિષ્ય મહસ્તત્ત્વમાગમાન્તગિરાં તતિઃ ।
તદ્ધામ કામયૈકાન્તકલિકલ્મષનાશનમ્ ॥ ૭૫॥

અણોરણીયમાદ્યન્તમધ્યવિપ્લવવર્જિતમ્ ।
અહમારાધયે ચિત્તે માયાજાલવિમુક્તયે ॥ ૭૬॥

દેવદેવં મહાદેવં હરિમભ્યુદયેશ્વરમ્ ।
પશ્યામિ પરતત્ત્વાર્થં નિર્મુક્તાશેષકલ્મષમ્ ॥ ૭૭॥

ભગવન્ પરિતુષ્ટોઽસ્મિ માયાલાસ્યપ્રદર્શનાત્ ।
અહો વિભૂતિવિસ્તારો લીલાવૈશિષ્ટ્યલક્ષણઃ ॥ ૭૮॥

પુનાતિ લોકાન્ ગઙ્ગેવ દર્શનાત્કીર્તનાદપિ ।
ઇતઃ પરં ન શોચામિ યેનાહં ત્વત્પ્રસાદતઃ ॥ ૭૯॥

તથા કુરુ દયાં મહ્યં ત્વામહં શરણં ગતઃ ।

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૬૧-અધ્યાયાન્તર્ગતં

શ્રુતધામાકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૬૧/૭૦-૮૦ ॥

tAmraparNImAhAtmya . adhyAya 61/70-80..

Proofread by PSA Easwaran

---

*Shrutadhamakritam Vishnu Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*